रक्तकन्दलः, पुं. ( रक्तं रक्तवर्णं कन्दलं नवाङ्कुरो यस्य। ) प्रवालम्। इति त्रिकाण्डशेषः॥ ( गुणादयोऽस्य प्रवालशब्दे विज्ञेयाः॥ )

रक्तकमलं, क्ली, ( रक्तं रक्तवर्णं कमलम्। ) रक्तवर्णोत्पलम्। तत्पर्य्यायः। कोकनदम् २ रक्ताम्भोजम् ३ अरुणकमलम् ४ शोणपद्मम् ५ रक्तोत्पलम् ६ अरविन्दम् ७ रविप्रियम् ८ रक्तवारिजम् ९। (रक्तकम्बलम् १०। इति पाद्मोत्तरखण्डे १३ अध्यायः॥) अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। मधुरत्वम्। शिशिरत्वम्। रक्तदोषहरत्वम्। पित्तकफवातशमनत्वम्। सन्तर्पणकारित्वम्। वृष्यत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"विशेषतः सितं पद्मं पुण्डरीकमिति स्मृतम्।
रक्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम्॥
धवलं कमलं शीतं मधुरं कफपित्तजित्।
तस्मादल्पगुणं किञ्चिदन्यदक्तोत्पलादिकम्॥"

इति भावप्रकाशः॥

रक्तकम्बलं, क्ली, (कम्बलं जलमाश्रयत्वेनास्त्यस्येति। अर्श आद्यच्। रक्तं रक्तवर्णं कम्बलमुत्पलमिति।) रक्तोत्पलम्। यथा,—

"चन्दनागुरुकर्पूरकुङ्कुमैश्च सुगन्धिभिः।
कमलैः कुमुदैः पुष्पैः कह्लारै रक्तकम्बलैः॥
फलैर्धूपैरपूपैश्च शोभनैर्गुडमिश्रितैः।
अर्च्चयेद्बलिराजानं मन्त्रेण द्विजसत्तमः॥"

इति पाद्मोत्तरखण्डे १३ अध्यायः॥

रक्तकरवीरकः, पुं, ( करवीर+स्वार्थे कन्। ततो रक्तः रक्तवर्णः करवीरकः।) लोहितवर्णकरवीरपुष्पवृक्षः। लाल् कनेल् इति हिन्दी भाषा। तत्पर्य्यायः। रक्तप्रसवः २ गणेशकुसुमः ३ चण्डीकुसुमः ४ क्रूरः ५ भूतद्रावी ६ रविप्रियः ७। अस्य गुणाः। कटुत्वम्। तीक्ष्णत्वम्। विशोधनत्वम्। त्वग्दोषव्रणकण्डूतिकुष्ठविषहरत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"करवीरः श्वेतपुष्पः शतकुम्भोऽश्वमारकः।
द्वितीयो रक्तपुष्पश्च चण्डातो लगुडस्तथा॥
करवीरद्वयं तिक्तं कषायं कटुकञ्च तत्।
व्रणलाघवकन्नेत्रकोपकुष्ठव्रणापहम्।
वीर्य्योष्णं क्रिमिकण्डूघ्नं भक्षितं विषवन्मतम्॥"

इति भावप्रकाशः॥

रक्तकाञ्चनः, पुं, ( रक्तः रक्तवर्णः काञ्चनः।) स्वनामख्यातपुष्पवृक्षविशेषः। तत्पर्य्यायः। विदलः २ चमरिकः ३। इति शब्दरत्नावली॥ काञ्चनालः ४ ताम्रपुष्पः ५ कुदारः ६। इति जटाधरः॥

रक्तकाण्डा, स्त्री, ( रक्तः रक्तवर्णः काण्डः दण्डोऽस्याः।) रक्तपुनर्नवा। इति राजनिर्घण्टः॥ ( विवरणमस्या रक्तपुनर्नवाशब्दे विज्ञेयम्॥ )

रक्तकाष्ठं, क्ली, ( रक्तं काष्ठं यस्य। ) पत्तङ्गम्। इति राजनिर्घण्टः॥ लोहितवर्णदारु च॥

रक्तकुमुदं क्ली, ( रक्तं रक्तवर्णं कुमुदम्।) रक्तकैरवम्। इति जटाधरः॥

रक्तकुसुमः, पुं, ( रक्तानि रक्तवर्णानि कुसुमान्यस्य। ) पारिभद्रः। धन्वनवृक्षः। इति राजनिर्घण्टः॥

रक्तकेशरः, पुं, (रक्ताः केशराः किञ्जल्काः अस्य।) पारिभद्रः। इति रत्नमाला॥

रक्तकैरवं, क्ली, ( रक्तं रक्तवर्णं कैरवम्।) रक्तकुमुदम्। इति जटाधरः॥ (यथास्य पर्य्यायः।
"तदल्पगन्धं सौमाख्यं हल्लकं रक्तकैरवम्॥"
इति वैद्यकरत्नमाला॥)

रक्तकोकनदं, क्ली, ( रक्तं रक्तवर्णं कोकनदम्।) रक्तोत्पलम्। इति जटाधरः॥ ( विशेषोऽस्य रक्तोत्पलशब्दे ज्ञातव्यः॥)

रक्तखदिरः, पुं, ( रक्तः रक्तवर्णः खदिरः।) रक्तवर्णखदिरवृक्षः। तत्पर्य्यायः। रक्तसारः २ सुसारः ३ ताम्रसारकः ४ बहुशल्यः ५ याज्ञिकः ६ कुष्ठनोदनः ७ यूपद्रुमः ८ अम्लखदिरः ९ अरः १०। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कषायत्वम्। गुरुत्वम्। तिक्तत्वम्। आमवातास्रवातव्रणभूतज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाश्च।

"खदिरो रक्तसारश्च गायत्री दन्तधावनः।
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः॥
खदिरः शीतलो दन्त्यः कण्डूकासारुचिप्रणुत्।
तिक्तः कषायो मेदोघ्नः क्रिमिमेहज्वरव्रणान्।
श्वित्रशोथामपित्तास्रपाण्डुकुष्ठकफान् हरेत्॥"

इति भावप्रकाशः॥

रक्तगन्धकं, क्ली, ( रक्तं रक्तवर्णं गन्धकम्।) बोलम्। इति राजनिर्घण्टः॥

रक्तगुल्मः, पुं, ( रक्तजो गुल्मः इति मध्यपदलोपी कर्म्मधारयः।) स्त्रीणां रक्तजगुल्मरोगः। तस्यौषधं यथा,—

"द्विजयष्टीत्रिकटुकं चूर्णं पीतं हरेच्छिव!।
तिलक्वाथेन संयुक्तं रक्तगुल्मं स्त्रिया हर!॥"

इति गारुडे १९६ अध्यायः॥

( तथास्य निदानादिकं यथा,—
"शोणितगुल्मस्तु खलु स्त्रिया एव भवति न पुरुषस्य गर्भकोष्ठार्त्तवागमनवैशेष्यात्। पारतन्त्र्यादवैशारद्यात् सततमुपचारानुरोधाद्वेगानुदीर्णानुपरुन्धत्या आमगर्भे वाप्यचिरात् पतिते तथाप्यचिरप्रजाताया ऋतौ वा वातप्रकोपनान्यासेवमानाया वातः प्रकोपमापद्यते। स प्रकुपितो योन्या मुखमनुप्रविश्यार्त्तवमुपरुणद्धि मासि मासि तदार्त्तवमुपरुध्यमानं कुक्षिं वर्द्धयति। तस्याः शूलकासातीसारच्छर्द्यरोचकाविपाकाङ्गमर्दनिद्रालस्यकफप्रसेकाः समुपजायन्ते स्तनयोश्च स्तन्यमोष्ठयोः स्तनमण्डलयोश्च कार्ष्ण्यं ग्लानिः चक्षुषोर्मूर्च्छा हृल्लासो दोहदः श्वयथुः पादयोरीषच्चोद्गमो रोमराज्या योन्याश्चाटालत्वमपि च योन्या दौर्गन्ध्यमास्रावश्चोपजायते। केवलश्चास्या गुल्मः स्पन्दते तामगर्भाङ्गभिणीमित्याहुर्मूढाः।" इति चरके निदानस्थाने तृतीयेऽध्याये॥ यथा च।

"न स्पन्दते नोदरमेति वृद्धिं
भवन्ति लिङ्गानि च गर्भिणीनाम्।
तं गर्भकालातिगमे चिकित्स्य-
मसृग्भवं गुल्ममुशन्ति तज्ज्ञाः॥"

इति सुश्रुते उत्तरतन्त्रे ४२ अध्यायः॥

तथा च। रक्तगुल्मस्तु स्त्रिया एव प्रजायते। यथा,—

"ऋतौ वा नवसूता वा यदि वा योनिरोगिणी।
सेवते वातलानिस्त्री क्रुद्धस्तस्याः समीरणः॥
निरुणद्ध्यार्त्तवं योन्यां प्रतिमासमवस्थितम्।
कुक्षिं करोति तद्गर्भलिङ्गमाविष्करोति च॥
हृल्लासदौर्हृदस्तन्यदर्शनं क्षामतादिकम्।
क्रमेण वायुसंसर्गात् पित्तयोनितया च तत्॥
शोणितं कुरुते तस्या वातपित्तोत्थगुल्मजान्।
रुक्संस्रावदाहातीसारतृड्ज्वरादीनुपद्रवान्॥
गर्भाशये च सुतरां शूलं दुष्टासृगाश्रये।
योन्याश्च स्रावदौर्गन्ध्यतोदस्पन्दनवेदनाः॥
न चाङ्गैर्गर्भवद्गुल्मः स्फुरत्यपि तु शूलवान्।
पिण्डीभूतः स एवास्याः कदाचित् स्पन्दते
चिरात्॥
न चास्या वर्द्धते कुक्षिर्गुल्म एव तु वर्द्धते।
स्वदोषसंश्रयो गुल्मः सर्व्वो भवति तेन सः॥'
पाकं चिरेण भजते नैव वा——————॥"

इति वाभटे निदानस्थाने एकादशेऽध्याये॥*॥

तथास्य चिकित्सा।

"सरक्तगुल्मे न च पाचनन्तु
न हिङ्गुपानं कटिपालनञ्च।
न चैव संस्वेदनमर्द्दनञ्च
न वा क्रमेणोत्प्लवनं हितञ्च॥
रोधाञ्जनं खदिरमागधिका समङ्गा
क्वाथोऽश्वेतसमं घृतसंप्रयुक्तम्।
गुल्मं सरक्तमपि चाथ निहन्ति शीघ्रं
कृत्स्नेदनञ्च विनिहन्ति च कुष्ठरक्तम्॥
क्षीरपानं प्रदातव्यं घृतसौवर्चलान्वितम्।
रक्तगुल्मविनाशाय यक्षद्विश्वतस्त्वेऽपि वा॥
न हिङ्गुसंयुतं पथ्यं न चोष्णं न विदाहि च।
रक्तजे वातजे गुल्मे मांसानि जाङ्गलानि च॥"

इति हारीते चिकित्सितस्थाने चतुर्थेऽध्याये॥)

अन्यत् गुल्मशब्दे द्रष्टव्यम्॥*॥

रक्तघ्नः, पुं, ( रक्तं हन्तीति। हन्+"अमनुष्यकर्त्तृके च।" ३।२।५३। इति टक्।) रोहितकवृक्षः। इति जटाधरः॥ ( रोहितकशब्देऽस्य विशेषो ज्ञेयः॥ )

रक्तघ्नी, स्त्री, (रक्तं हन्तीति। हन्+टक्। ङीप्।) दूर्व्वाविशेषः। गाँठिया दूर्वा इति भाषा॥ यथा,
"महौषधिश्च गोलोम्यां रक्तघ्नी रक्तपित्तहा॥"

इति शब्दचन्द्रिका॥

रक्तचन्दनं, क्ली, ( रक्तं रक्तवर्णं चन्दनम्।) रक्तवर्णचन्दनकाष्ठम्। (यथा, रामायणे।२।३३।९।
"पद्मरागोचितां शीतां रक्तचन्दनसेविनीम्।
वर्षमुष्णञ्च शीतञ्च नेष्यत्याशु विवर्णताम्॥")
तत्पर्य्यायः। तिलपर्णी २ पत्राङ्गम् ३ रञ्ज-